## लोपस्त आत्मनेपदेषु । (४१/३५६३)

आत्मनेपदेषु यस्तकारः तस्य छन्दसि विषये लोपो भवति । 'देवा अदुह्र' (मै. ४.२.१) । गन्धर्वाप्सरसो अदुह्र । अदुहत इति प्राप्ते । 'दुहामश्विभ्यां पयो अघ्न्येयम्' (ऋ. १.१६४.२७) । दुग्धाम् इति प्राप्ते । '[1]दक्षिणत उपशये' (काठ. २०.६) । शेते इति प्राप्ते । अपीत्यधिकारान्न भवति, [2]तत्र आत्मानमनृतं कुरुते । आत्मनेपदेषु इति किम् ? 'वत्सं दुहन्ति कलशं चतुर्बिलम्' (तै.ब्रा. ३.७.४.१६) ॥

## ध्वमो ध्वात् । (४२/३५६४)

छन्दसि विषये ध्वमो ध्वात् इत्ययमादेशो भवति । 'अन्तरेवोष्माणं [3]वारयध्वात्' (मै. ३.४.१३) । वारयध्वम् इति प्राप्ते ॥

## यजध्वैनमिति च । (४३/३५६५)

यजध्वम् इत्येतस्य एनमित्येतस्मिन् परतो मकारलोपो निपात्यते वकारस्य च यकारः छन्दसि विषये । 'यजध्वैनं प्रियमेधाः' (ऋ. ८.२.३७) । यजध्वमेनम् इति [4]प्राप्ते ॥

## तस्य तात् । (४४/३५६६)

तशब्दस्य लोण्मध्यमपुरुषबहुवचनस्य स्थाने तात् इत्ययमादेशो [5]भवति । 'गात्रं गात्रमस्यानूनं कृणुतात्, (मै.४.१३.४.२५) । कृणुत इति प्राप्ते । 'ऊवध्यगोहं पार्थिवं खनतात्' (मै.४.१३.४.२५) । खनत इति प्राप्ते । 'अस्ना रक्षः संसृजतात्' (मै. ४.१३.४.२५) । संसृजत इति प्राप्ते । 'सूर्यं चक्षुर्गमयतात्' (मै. ४.१३.४.२४) । गमयत इति प्राप्ते ॥

## तप्तनप्तनथनाश्च । (४५/३५६७)

तस्य इति वर्तते । छन्दसि विषये तस्य स्थाने तप् तनप् तन थन इत्येते आदेशा भवन्ति । तप् – 'शृणोत ग्रावाणः' (तै. १.३.१३.१) । शृणुत इति प्राप्ते । 'सुनोत' (ऋ. ७.३२.८) । सुनुत इति प्राप्ते । तनप् – 'सं वरत्रा दधातन' (ऋ. १०.१०१.५) । धत्त इति प्राप्ते । तन – 'जुजुष्टन' (ऋ. ४.३६.७) । जुषत इति प्राप्ते । छान्दसत्वात् श्लुः । थन – 'यदिष्ठन' (ऋ. १०.६३.६) । यदिच्छत इति प्राप्ते । पित्करणमङित्त्वार्थम् ॥

---

1. दक्षिणतः शये ब. क. ड. 2. तत्रैव आत्मानं आदृतं कुरुते ब. 3. वावदध्वम् क. 4. प्राप्ते नास्ति ब. 5. छन्दसि इत्यधिकम् क.